M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 782

Title: Charana Vycohara

Sutra

782

चरणव्यूहम्

Charana Vyooham	Title
	Author
	Editor
	Year, Vols.
	Publisher
782	Remarks

श्रीगणेशायनमः॥ हरिः ओंम्॥ अथातश्चरणव्यूहं व्याख्यास्यामस्तत्र
यदुक्तं चातुर्वेध्यं चत्वारो वेदा विज्ञाता भवंत्यृग्वेदो यजुर्वेदः सामवेदो ऽथ
र्ववेदश्चेत्यग्निमीळे पुरोहितमिषे त्वोर्जे त्वा ऽग्न आयाहि वीतये शन्नो दे
वीरभिष्टय इति तत्र ऋग्वेदस्याष्टौ स्थानानि भवंति च र्चाश्रावकश्चर्चकः श्र ^क ४
वणीयपारः क्रमपारः क्रमजटः क्रमशठः क्रमरथः क्रमदंडश्चेति चतुष्पा
रायणमेतेषां शाखाः पंचविधा भवंत्याश्वलायनी सांख्यायनी शाकला बा
ष्कला मांडूकेयाश्चेति तेषामध्ययनमध्यायाश्चतुःषष्टिर्मंडलानि द
शैव तु॥ वर्गाणां परिसंख्यातं द्वे सहस्रे षट् तरे सहस्रमेकं सूक्तानां

॥चर॰ह॥ निर्विशंकंविकल्पितं॥दशसहस्रस्कृपथ्यंतेसंख्यातंवैपदक्रमं॥एकंश श २
तसहस्रंवात्रिपंचाशत्सहस्राणिमेतानिचतुर्दशावासिष्ठानामितरेषां
॥१॥ पंचाशीतिःक्रमकालेतुवक्तव्यंचतुस्त्रिंशत्सहस्राणिद्विखंडानांसह
स्राणांद्वात्रिंशत्तुंचषोडशोत्तराश्चवारिंशत्सहस्राणिद्वात्रिंश
तंचास्रस्सहस्राणि॥ऋचांदशसहस्राणिऋचांपंचशतानिच॥
ऋचामशीतिःपादश्चैतत्पारायणमुच्यते॥एकंचएकवर्गश्चएक
श्चनवकस्तथा॥द्वेवर्गोद्विऋचौतेयौत्रीणित्रीणिशतस्तथा॥सह ॥१॥
स्रमेकंपंचानांशतमष्टनविंशत्सप्तकानांद्विचसप्तोत्तरेशतेचतुर्ऋ

चैत्रीणिशतानिषट्कानांत्रीण्यानांषष्टिरष्टकानां॥शाकल्यदृष्टंपदलक्षमे
कंसार्द्धंतुवेदेत्रिसहस्रयुक्तं॥शतानिचाष्टौषड्विंशतिःपदसंख्याःप्र
कीर्तिताः॥१॥यजुर्वेदस्यषडशीतिर्भेदाभवंतितत्रचरकानांदशभे
दाभवंतिचरकाआह्वरकाःकठाःप्राच्यकठाःकपिष्ठलकठाःशाराय
णीयावारायणीयावार्तांतवेयाःश्वेताश्वेततराःमैत्रायणीयाश्चेति
तत्रमैत्रायणीयानांसप्तभेदाभवंतिमानवावाराहदुंदुभाश्छैकेयावाराहा
रिद्रवेयाःश्यामाश्यामायणीयाश्चेतितेषामध्ययनमष्टशतंयजुःस
हस्राण्यधीत्यशाखापारोभवतितान्येवद्विगुणान्यधीत्यपदपारोभ

चर॰ ३॥ वर्तितान्येवत्रिगुणान्यधीत्यक्रमपारोभवतिषडंगान्यधीत्यषडंगविद्
॥२॥ वतिशिक्षाकल्पोव्याकरणंनिरुक्तंछंदोज्योतिषमित्यंगानिभवंतित
त्रप्राच्युदीच्यांनिर्ऋत्यांनिर्ऋत्यंतत्रवाजसनेयानांसप्तदशभवं
तिजाबालाबौधेयाःकाण्वामाध्यंदिनाःशापेयास्तापनीयाःकापा
लाःपौंड्रवत्साआवटिकाःपरमावटिकाःपाराशर्यावैनेयावैधेया
औधेयागालवाबैजवाःकात्यायनीयाश्चेति॥प्रतिपदमनुपदंछंदो
भाषाधर्मोमीमांसान्यायस्तर्कइत्युपांगानिभवंत्युपज्योतिषंसांग ॥२॥
लक्षणंपरिशिष्टानुवाकाःपरिसंख्याचरणव्यूहःश्राद्धकल्पःप्रवरा

ध्यायश्चशास्त्रक्रतुःसंख्यानुगमपर्तपार्श्वानहौत्रिकंपशावोक्था
नीकूर्मलक्षणमित्यष्टादशपरिशिष्टानिभवंतिद्विसहस्रेशतेन्यूने
मंत्रेवाजसनेयके॥ऋग्युक्तंपरिसंख्यातमेतच्छुकलंशिशुक्रियं॥मं
त्राश्चपरिसंख्याताब्राह्मणंतुचतुर्गुणं॥तत्रतैत्तिरीयानांद्विभेदा
भवंति॥औख्याःकांडिकेयाश्चेतितत्रकांडिकेयानांपंचभेदाभवं
त्यापस्तंबीबौधायनीसत्याषाढीहिरण्यकेशीऔघेयीश्चेतितत्र
कांडानांतुपगायत्वविशेषश्चवृश्चिकेशास्तुपगंथः॥मंत्रब्राह्मणयो
र्वेदस्त्रिगुणंयत्रपठ्यते॥यजुर्वेदःसविज्ञेयोअन्यशाखांतरा

चर॰ व्या॰ स्मृतास्तेषामध्ययनं प्रवचनीयाश्चेति ॥ २ ॥ सामवेदस्य अखिल
सहस्रभेदा आसीदनध्यायेष्वधीयानास्ते शक्रेणाभिहताः प्रनष्टाः
॥३॥ शेषाः प्रवक्ष्याम्यास्क राणायणीया वा सुरायणीया वा र्तीतवेयाः प्रांजु
लीरुग्मायिनेभेदाः प्राचीनयोग्याश्चेति तत्र राणायनीयानां नवभे
दा भवंति राणायनीयाः शाट्यायनीयाः शाट्यमुद्गलाः खलव
लाः लांगलाः कौथुमा गौतमा जैमिनीयाश्चेति तेषाम् ऐ साम सह
स्राणि सामानि च चतुर्दश ॥ अष्टौ शतानि भवंति दश ततः सवाल ॥३॥
खिल्यः ससुवर्णप्रैष्यं एतत्साम गणं स्मृतं ॥ ३ ॥ अथर्ववेदस्य
महाखलवलार

भेदा नवभेदा भवंति पैप्पला दांता प्रदांता स्तौता औता ब्रह्मदापला शौनकी
देवदर्शा चरणविद्याश्चेति तेषामध्ययनं पंच कल्पा भवंति नक्षत्र
कल्पो विधानकल्पो विधिविधानकल्पः संहिताकल्पः शांतिकल्प
श्चेति सर्वेषां वेदानामुपवेदा भवंति ऋग्वेदस्यायुर्वेदोपवेदो यजु
र्वेदस्य धनुर्वेदोपवेदो सामवेदस्य गांधर्ववेदोपवेदो अथर्ववेदस्य वे९
सर्वशास्त्रशास्त्राणि भवंति ऋग्वेदस्याग्निगोत्रं ब्रह्मदैवत्यं गायत्रं
छंदः ॥ यजुर्वेदस्य भारद्वाजगोत्रं रुद्रदैवत्यं त्रैष्टुभं छंदः ॥ साम
वेदस्य काश्यपगोत्रं विष्णुदैवत्यं जागतं छंदः ॥ अथर्ववेदस्य वै

त्रै
चर०व्यू जायनगोत्रमिंद्रदैवत्यमानुष्टुभंछंदः॥ ऋग्वेदोऽरुणवर्णःपद्मपत्रा
यताक्षः स्कंधविभक्तग्रीवः कुंचितकेशश्मश्रुप्रमाणाद्द्विरत्निमात्रः॥
॥४॥ यजुर्वेदः कृशो दीर्घः कपाली ताम्रवर्णः कांचननयन आदित्यवर्णो
वर्णेन पंचरत्निमात्रः॥ सामवेदो नित्यस्रग्वी शुचिः शुचिवासी क्षोमी
दांती चर्मी दंडी कांचननयनः श्वेतो वर्णो वर्णेन षडरत्निमात्रः॥ अथर्व
वेदस्तीक्ष्णश्चंडः क्रूरः कामः कामरूपी क्षुद्रकर्मी सहइव साध्यस
विश्वजलमूर्धिगालवस्सराहूतोहः पराक्षियाण्याश्वेति ससारत्नि ॥४॥
मात्रः॥ यमींद्रदैवतरूपं गोत्रंप्रमाणंछंदोवर्षावर्णेनजन्मजन्मनि

भव
वेदपारगो भवति जन्मनि वेदधारगो भवत्यप्रहितः प्रहितोऽसि ब्रह्मचारी
नरी भवति जातिस्मरो जायते नमः ऋषिभ्यः शौनकायनमः शौनकाय॥
॥४॥ य इमं चरणव्यूहं श्राद्धकाले सुदापठेत्तु॥ अक्षय्यं तद्भवेच्छ्राद्धं
पितृंश्चैवोपतिष्ठते॥ य इमं चरणव्यूहं गर्भिणी श्रावयेत्स्त्रियं॥ पुमां
सं जनयेत्पुत्रं सर्वं तं वेदपारगं॥ य इमं चरणव्यूहं पर्वसु श्रावयेद्द्वि
जः॥ धौतपाप्मा शुचिर्विप्रो ब्रह्मसायुज्याय कल्पते॥ योऽधीते चरणव्यूहं
सविप्रः बुद्धिपावनः॥ तारयत्यखिलान्सर्वान्पुरुषान्सप्त सप्त च॥ यो
नामपुरा देवा अमृतत्वं च गच्छति॥ लोकाचितं महाशांतिममृतत्वं

चर॰ ६ चागच्छंत्यो नम इत्याह भगवान्व्यासः पाराशर्यः परमऋषिभ्यो नमः परम
ऋषिभ्यो नम इति ॥ ५ ॥ इति चरणव्यूहं समाप्तं ॥ हडकरोपनामक
९ जनार्दनेन लिखितं ॥ वस्तीतेर्वण ॥

९